प्रवेश सं० ४५२२४ विषय: धर्मशास्त्रम् क्रम सं०

नाम चतुर्विंशतिमतम् ग्रन्थकार भट्टोजिदीक्षित:

पत्र सं० १–१६ 13440

श्लोक सं० अक्षर सं० (पंक्तौ) ३५ पंक्ति सं० (पृष्ठे) ९

आकार: १०·१ x ४·४ लिपि: दे. ना. आधार: का.

वि० विवरणम् सं. आशौचप्रकरणम् स. १८३२

अ. ४०६०

पी० एस० यू० पा०––७७ एस० सी० ई०––१६५१––५० ०००

Indira Gandhi National
Centre for the Arts

॥अथचतुर्विंशत्याशौचकांडप्रारंभः पत्रसंख्या १६॥

Indira Gandhi National
Centre for the Arts

श्रीगणेशाय नमः ॥ अथाशौचप्रकरणं ॥ आशौचं नाम पुरुषनिष्ठः कालस्नानाद्यपनोद्यः कर्मा
१ नावरूपो धर्मस्तत्र वर्ज्यमाह मूले ॥ आशौचे वर्जयेत्सर्वं नित्यनैमित्तिकादिकं ॥ अग्निहोत्रं विहायान्य
त्स्मार्तं पौराणिकं तथा ॥ अग्निहोत्रं विहायान्यत्सर्वं वर्जयेदित्यन्वयः ॥ अग्निहोत्रग्रहणं संध्यादे
रुपलक्षणं ॥ यदाह पुलस्त्यः ॥ संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् ॥ न त्यजेत्सूतके वापि त्य
जन्गच्छत्यधो गतिमिति ॥ यत्तु मनुनोक्तं ॥ उभयत्र दशाहानि कुलस्यान्नं न भुज्यते ॥ दानं प्रतिग्रहो हो
मः स्वाध्यायश्च निवर्तत इति तत्स्मार्तवैश्वदेवादिविषयकं ॥ तदाह जातूकर्ण्यः ॥ पंचयज्ञविधानं च न
कुर्यान्मृत्युजन्मनोरिति ॥ यत्तु जाबालेनोक्तं ॥ संध्यां पंचमहायज्ञान्नैत्यकं स्मृतिकर्म च ॥ तन्मध्ये राम
हापयेद्देव आशौचांते तु तत्क्रियेति ॥ तद्वाचिकसंध्याभिप्रायं ॥ स्नानसंध्याप्रकारस्त्वाह्निकप्रकर १
ण एवोक्तः ॥ स्मार्तकर्मवर्जनं च दानादिविषयकं ॥ गृह्याग्निसाध्यास्तु होमाः कार्या एव ॥ वैतानो

पासनाः कार्या इति याज्ञवल्क्योक्तेः ॥ वैतानाः श्रौताग्निसाध्याः प्रतिदिनमुपास्यंत इत्युपासना गृह्याग्नि
सत्रभवा औपासना इति विज्ञानेश्वरः ॥ पैठीनसिरपि ॥ नित्यानि निवर्तेरन्वैतानवर्जं ॥ शालाग्नौ चैके इ
ति ॥ गार्ह्याणां नित्यानां पाक्षिकत्वे तत्यर्थः ॥ तानि च कारयितव्यानि ॥ न तु स्वयं कर्तव्यानि ॥ अन्य एतानि
कुर्युरिति पैठीनसिस्मरणात् ॥ बृहस्पतिनाप्युक्तं ॥ सूतके मृतके चैव ह्यशक्तौ श्राद्धभोजने ॥ प्रवासा
दिनिमित्तेषु हावयेन्न तु हापयेदिति ॥ जातूकर्ण्योपि ॥ सूतके तु समुत्पन्ने स्मार्तं कर्म कथं भवेत् ॥ पिं
उयज्ञं चरुं होमम सगोत्रेण कारयेदिति ॥ यद्यपि अंगजातमन्येन कार्यते तथापि स्वद्रव्यत्यागा
त्मकं प्रधानं स्वयमेव कुर्यात् ॥ तस्यानन्यनिष्पाद्यत्वादिति विज्ञानेश्वरादयः ॥ उभयत्र दशाहानि कु
लस्यान्नं न भुज्यत इति मनुवाक्यशेषस्यायमर्थः ॥ उभयत्र जननमरणयोः दशाहानीत्याशौचकालोपल
क्षणं ॥ कुलस्य आशौचयुक्तस्य अन्नं असकुल्यैर्न भुज्यते ॥ सकुल्यानां तु न दोषः ॥ सूतके तु कुलस्यान्न
मदोषं मनुरब्रवीदिति तेनैवोक्तेः ॥ अयं च निषेधो दातृभोक्त्रोरन्यतरेणापि ज्ञाते सति द्रष्टव्यः ॥ उभ

Indira Gandhi National Centre for the Arts

ष्याम परिज्ञाते सूतके नैव दोषकृत्॥ एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेदिति षट्त्रिंशन्मते दर्शना
२ त्॥ तथा विवाहादिषु सूतकोत्पत्तेः प्राक् ब्राह्मणार्थं पृथक्कृतमन्नं भोक्तव्यमेव॥ विवाहोत्सवयज्ञे
षु त्वंतरामृतसूतके॥ पूर्वसंकल्पितार्थेषु न दोषः परिकीर्तित इति वचनात्॥ यद्यपि प्रारब्धे यज्ञादौ
कर्तुः शुद्धिर्वक्ष्यत एव तथापि तेनासंकल्पितं द्रव्यं न ग्राह्यं किंतु प्राक्संकल्पितमेवेति प्रकृतश्लो
कार्थ इति माधवादयः। अत्र च विवाहग्रहणं पूर्वप्रवृत्तचोलोपनयनादिसंस्कारकर्मोपलक्षणार्थं।
उत्सवो देवतोत्सवः। तेन च तत्प्रतिष्ठादिकमुपलक्ष्यते। यज्ञो ज्योतिष्टोमादिः। तेषु प्रारब्धेषु अंत
रामध्ये यदि मृतसूतके मरणजनने स्यातां तदेति योजयति॥ समाहारद्वंद्वे सप्तम्येकवचने सप्तम्या
श्रयणे तु नाध्याहारक्लेशः। पक्षे तु विशेषः स्मर्यते॥ विवाहोत्सवयज्ञादिष्वंतरामृतसूतके॥ शेष राम:
मन्नं परैर्देयं दातॄन्भोक्तॄंश्च न स्पृशेदिति कूर्मः॥ अन्नमसूतकिभिर्देयं॥ सूतकी तु दातॄन्भोक्तॄंश्च न २

स्पृशेदित्यर्थः॥ विवाहादेरन्यत्र तु भुंजानेषु तु विप्रेषु अंतराशौचे अन्यगेहोदकाचांताः शुद्धाः। तदुक्तं षट्त्रिं
शन्मते॥ भुंजानेषु तु विप्रेषु त्वंतरामृतसूतके॥ अन्यगेहोदकाचांताः सर्वे ते शुचयः स्मृता इति॥ कानि
चित्संकल्पितान्यपि द्रव्याणि सर्वदा शुद्धानि॥ तथा च मरीचिः॥ लवणे मधुमांसे च पुष्पमूलफलेषु च।
शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयःसु च॥ तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः॥ पण्येषु चैव सर्वे
षु नाशौचं मृतसूतके इति॥ पक्वं भक्ष्यजातं अपक्वं तंडुलादि॥ स्वयंग्रह इति स्वयमेव स्वाम्यनुज्ञा
तो गृह्णीयादित्यर्थः। पक्वापक्वाभ्यनुज्ञातमन्नसत्रप्रवृत्तविषयं॥ अन्नसत्रप्रवृत्तानामा
ममन्नमगर्हितं। भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु पयः पिबेत्॥ इत्यंगिरःस्मरणात्॥ अत्र पक्वश
ब्दो भक्ष्यव्यतिरिक्तौदनादिविषय इति विज्ञानेश्वरः॥ शावसंसर्गनिमित्ताशौचे तु विशेषमाहांगि
राः॥ आशौचं यस्य संसर्गादापतेद्गृहमेधिनः। क्रियास्तस्य न लुप्यंते गृह्याणां च न तद्भवे
दिति॥ गृह्याणां गृहभार्यादीनां तद्द्रव्याणां च न भवेदित्यर्थः। अतिक्रांताशौचेऽपि विशेषः स्म

Indira Gandhi National
Centre for the Arts

यते। अतिक्रांते दशाहे तु पश्चाज्जानाति चेद्गृही॥ त्रिरात्रं सूतकं तस्य न तद्व्यस्य कर्हिचिदिति॥ मूले। सू
३ तकं द्विविधं प्रोक्तं जातकं मृतकं तथा॥ तयोः शुद्धिं प्रवक्ष्यामि ब्राह्मणादिक्रमेण तु॥ सूतकशब्देनाशौचं ल
क्ष्यते॥ तच्च द्विविधं॥ जननप्रयुक्तं जातकं। मरणप्रयुक्तं तु मृतकमित्यर्थः। मूले॥ सद्यःशौचमथैका
हस्त्र्यहश्चतुरहस्तथा॥ षडहो दशरात्रश्च द्वादशाहस्तथैव च॥ पक्षो मासोथ भस्मांतं दश पक्षास्तु
सूतके। एवं क्रियाविशेषेण सूतकं तु विधीयते इति॥ सूतक इति आशौचेत्यर्थः। भस्मांतमिति। मरणा
वधीत्यर्थः॥ एते च सद्यःशौचादयः पक्षाः व्यवस्थयैव बोद्धव्या इत्याह॥ क्रियाविशेषेणेति। अध्ययनाऽ
ग्निहोत्रादिति विशेषणेत्यर्थः। तथा च दक्षः॥ ग्रंथार्थतो विजानाति वेदमंगैः समन्वितं॥ सकल्पं सरह
स्यं च क्रियावांश्चेन्न सूतकं॥ एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः॥ हीने हीनतरे चापि त्र्यहश्च
तुरहस्तथा॥ तथा हीनतरे चैव षडहः परिकीर्तितः॥ ये दशाहादयः प्रोक्ता वर्णानां ते यथाक्रमं॥ अ राम
स्नात्वा चाप्यहुत्वा च अदत्वाश्नाति यो द्विजः॥ एवंविधस्य विप्रस्य सर्वदा सूतकं भवेदिति॥ देवलोपि॥ ३

चत्वार्यधीतवेदानां महान्याशौचमिष्यते॥ वेदाग्नियुक्तविप्रस्य त्र्यहमाशौचमिष्यते॥ एताभ्यांश्रुत
युक्तस्य दिनमेव विधीयते॥ एतैः साकं कर्मयुक्तः सद्यः शुचिरसंशय इति। मूलेपि व्यवस्थामाहुः। आ
हिताग्नेः सदा शुद्धिः सद्य एव विधीयते॥ एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः॥ त्र्यहात्केवल
वेदस्तु निर्गुणो दशभिर्दिनैः। ये वेश्यापतयो विप्रा ये वै शूद्रान्नभोजिनः॥ मांसादा ये दुराचारा
ये वै ब्राह्मणनिंदकाः॥ अस्नातभोजिनो ये वै क्रियाहीना गुरुद्विषः। ये चान्ये पापकर्माणस्ते वै
भस्मांतसूतका इति एतच्च युगांतरविषयकमित्यवधेयं॥ वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथे
ति कलिनिषिद्धेषु परिगणनात्॥ हारीतोप्याह॥ दशाहमेव विप्रस्य सपिंडमरणे सति॥ कल्पांतरा
णि कुर्वाणः कलौ व्यामोहकिल्बिषीति॥ अथ मूलानुक्तोपि स्रावादिष्वाशौचनिर्णयः कथ्यते॥
पराशरः। आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः॥ अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भ
वेदिति॥ तत्र स्रावे आद्यमासत्रये मातुस्त्रिरात्रमाशौचं॥ उपरि आषष्ठमासे स्राव्यदिनमा

Indira Gandhi National
Centre for the Arts

शौचं॥तदाहगौतमः॥गर्भमाससमारात्रीः स्रंसने गर्भस्य त्र्यहं वेति अत्र मासत्रयं यावत्त्र्यहं। ततः परं
४ माससमा रात्रयः इति व्यवस्थितो विकल्पः॥तथा च मरीचिः॥गर्भस्रुत्यां यथामासमचिरे तूत्तमे
त्रयः। राजन्ये तु चतूरात्रं वैश्ये पंचाहमेव तु॥ अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तितेति॥ अचि
रे मासत्रयादर्वाग्गर्भस्रावे उत्तमे ब्राह्मणजातौ त्रिरात्रमित्यर्थः इति विज्ञानेश्वरमाधवाद
यः॥ सगोत्रसपिंडानां तु स्नानमात्रेण सद्यः शुद्धिः स्रावे। पाते तु सपिंडानां त्रिरात्रं। स्रावे मातु
स्त्रिरात्रं स्यात्सपिंडाशौचवर्जनं॥ पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति मरीचिस्मरणा
त्॥ सप्तममासप्रभृति तु स्वजात्युक्तं दशाहादि सपिंडानां मातुश्च। पक्षे तूक्तं मूले। अधस्तान्नवमा
न्मासाच्छुद्धिः स्यात्प्रसवे कथं॥ मृते जीवति वा तस्मिन् अहोभिर्माससंख्यये ति। अस्यायम
र्थः। नवमादर्वाक्प्रसवे सति सप्तमाष्टममासयोरिति यावत्। सूतिकाव्यतिरिक्तसर्वसपिंडा राम ४
नां जनननिमित्तमाशौचं माससंख्यया बोध्यं॥ सूतिकायास्तु दशाहमेव॥ प्रागुक्तवचनात्॥

नन्वेवं जातो विप्रो दशाहेनेति सर्वसपिंडानां दशाहाशौचविधायकं वचनं विरुध्यतेति चेन्न॥ तस्या
नवमदशममासप्रसवविषयकत्वादिति माधवः॥ यत्तु॥ अथवा विकल्प इति माधवेनेवोक्तं तच्चिं
त्यं। सामान्यविशेषशास्त्रयोर्विकल्पस्य दुरुपपादत्वात्॥ मृते जीवति वा तस्मिन्निति वाक्यशेष
स्य तु अयमाशयः। जन्माशौचमध्ये शिशुमरणं जनननिमित्तकमुक्तमेवाशौचं न तु मरणनिमि
त्तकमिति। तथा च बृहन्मनुः॥ दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः। शावाशौचं न कर्त्तव्यं सूत्याशौ
चं विधीयते इति निष्प्राणस्यापि निर्गमेप्येवं। तथा च पारस्करः॥ गर्भे यदि विपत्तिः स्याद्दशाहं सूतकं भ
वेत्॥ जीवन् जातो यदि ततो मृतः सद्य एव विशुध्यतीति। अत्र पूर्वार्द्धं प्रसवनिमित्ताशौचसंज्ञापरं
स्फुटमेव। उत्तरार्द्धं तु प्रेताशौचविरहपरं। इदं च सूत्याशौचं यद्यप्यविशेषेण दशाहाभ्यंतरम
रणे बृहन्मनुनोक्तं तथापि नालच्छेदोर्ध्वमरणविषयकं बोध्यं। ततः प्राङ्मरणे तु त्रिरात्रमेव पि
त्रादीनां त्रिरात्रकमिति। यद्यपीह वचनद्वयेन नालच्छेदप्रागूर्ध्वकालानुपादानात्तुल्यवत्स्था

Indira Gandhi National
Centre for the Arts

नस्पृष्टा॥ तथा विवचनांतरेण निर्णयः। तथा च जैमिनिः॥ यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं॥ छि
५ न्ने नाले ततः पश्चात् सूतकं तु विधीयत इति॥ अत्र पूर्वोक्तं सूतकमित्यस्यानंतरं संपूर्णमिति शेषः। तथा
च नालछेदात्पूर्वं शिशुमरणे सपिंडानां दशाहादिकं संपूर्णं सूतकं नाप्नोति किंतु दिनत्रयं पश्चात्तु पूर्णं सू
तकं विधीयत इति प्रागुक्तयोर्मनुवाक्ययोर्व्यवस्थापरमिदं जैमिनिवाक्यमिति विज्ञानेश्वरमतं॥ य
त्तु बृहत्प्रचेतो वचनं मुहूर्तं जीवितो बालः पंचत्वं यदि गच्छति॥ मातुः शुद्धिर्दशाहेन सद्यः शुद्धास्तु
गोत्रिया इति तदग्निहोत्रार्थं सद्यः शौचपरं॥ अग्निहोमार्थं स्नानोपस्पर्शनात्॥ तत्कालशौचमिति शंख
वचनादिति विज्ञानेश्वरः। एवं स्थिते बाले मृते सपिंडानां सद्यःशौचं विधीयते॥ दशाहेनैव दंपत्योः सो
दराणां तथैव चेति माधवोदाहृतव्याघ्रवचनं विज्ञानेश्वरमते कथं योजनीयमिति चिंत्यं। अत एव राम.
मातापितृसहोदरव्यतिरिक्तानां सपिंडानां मरणनिमित्तं सद्यःशौचमिति माधवो व्याख्यत। दशा ५
हादुपरि नामकरणात्पूर्वं शिशुमरणे तु निखननमेव। नाऽग्न्युदकदाने। ज्ञातीनां सचैलस्ना

नात्सद्यःशुद्धिः। नामकरणानंतरं दंतजननात्प्राक् मरणे तु दाहखननयोर्विकल्पः। तत्र दाने ज्ञातीना
मेकाहः। अनुगमनं तु कृताकृतं। खनने न पक्षे तु सद्यःशुद्धिः। दंतजननात्पूर्वमपि त्रिवर्षपर्यंतं अकृ
तचूडस्य खननदहनयोर्विकल्प एव। खनने एकाहमाशौचं। दहने त्रिरात्रं। अत्र तु न द्विवर्षात्तमनुग
मनं कृताकृतं। पश्चान्नित्यं। कृतचूडस्य तु त्रिवर्षात्पूर्वमपि तूष्णीं दहनं तूष्णीमुदकदानं त्रिरात्राशौ
चं च नियतमेव। त्रिवर्षादूर्ध्वं तु यावदुपनयनं कृतचौलस्याकृतचौलस्य वा मरणे अनुगमनं दहनं त्रिरा
त्राशौचं च नियतमेव। अत्रार्थे वचनानि॥ ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः॥ आश्मशानादनुव
ज्य इतरो ज्ञातिभिर्मृतः॥ इति याज्ञवल्क्यः। ततस्तस्मादूनद्विवर्षादितरो ज्ञातिभिराश्मशानादनु
व्रज्य इत्युक्त्या ऊनद्विवर्षे अनुगमनं कृताकृतं। ततः परं तु नियतमिति स्फुटीकृतं। नात्रिवर्षस्य कर्त
व्या बांधवैरुदकक्रिया॥ जातदंतस्य वा कुर्यान्नाम्नि वापि कृते सतीति॥ उदकक्रियेत्यग्नि
संस्कारोपलक्षणार्थमिति माधवादयः। अत्र पूर्वोक्तेन त्रिवर्षानंतरं दशाहादेरावश्यकत्वात्तु

Indira Gandhi National
Centre for the Arts

टीकृता॥ उत्तरार्द्धेन तु नाग्निकृते दंते जाते च वैकल्पितोच्यते॥ याज्ञवल्क्यः॥ आदंतजन्मनः सद्य आचूडान्नैशि
६ कीस्मृता॥ त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परमिति। अत्रादंतजन्मनः सद्य इत्यकृतचौलस्य खननप
क्षे बोद्धव्यं॥ अजातदंते बाले प्रेते सद्य एव नास्याग्निसंस्कारो नोदकक्रियेति महाविष्णुस्मरणात्॥ प्राङ्ना
मकरणात्सद्य एकाहो दंतजन्मन इति माधवोदाहृतवचनं तु दाहपक्षे बोद्धव्यं॥ नाग्निर्वापीत्युदाहृतमनु
स्मृत्या दाहे वैकल्पिकतालाभात्कृतचौडल्यं तु दाहो नित्यः। तथा च षट्त्रिंशन्मते॥ यद्यप्यजातदंताः स्या
त्कृतचूडस्तु संस्थितः॥ तथापि दाहयेदेनं त्र्यहं चाशौचमाचरेदिति॥ आचूडान्नैशिकीति तु खननपक्षा
भिप्रायं॥ दाहे तु त्रिरात्रं॥ तथा चांगिराः॥ यद्यप्यकृतचूडो वै जातदंतस्तु संस्थितः॥ दाहयित्वा तथा
प्येनमाशौचं त्र्यहमाचरेदिति॥ मातापित्रोस्तु अनुपनीतशिशुमरणे दहनखननयोरविशेषेण
त्रिरात्रं॥ बैजिकादपि संबंधादनुरुंध्यादघं त्र्यहमिति स्मरणात्॥ स्त्र्यपत्यमरणे तु विशे राम
षः। त्रिपुरुषपर्यन्तज्ञातीनामा चौलात्सद्यः शुद्धिः। ततो वाग्दानादर्वागेकाहमाशौचं ६

ततो विवाहादर्वाक्पतिपक्षे पितृपक्षे च त्र्यहं॥ तदुक्तं ब्रह्मपुराणे॥ आजन्मनस्तु चौलांतं
कन्या यद्विपद्यते॥ सद्यः शौचं भवेत्तत्र सर्ववर्णेषु नित्यशः॥ ततो वाग्दानपर्यन्तं यावदेकाहमेव हि।
वाक्प्रदाने कृते तत्र ज्ञेयं चोभयतस्त्र्यहं॥ पितुर्वरस्य च ततो दत्तायां भर्तुरेव हीति॥ मरीचिरपि।
अवारिपूर्वप्रत्ता तु या नैव प्रतिपादिता॥ असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतमिति॥ उभ
योः वरपितृपक्षयोः। सापिंड्यं चात्र त्रिपुरुषमेव बोध्यं॥ अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञाय
त इति वसिष्ठस्मरणात्॥ अकृतचूडायाः सद्यः शौचं कृतचूडायामेकाह इति च मातापितृव्यति
रिक्तविषयकतयावधार्यः॥ २॥ पित्रोस्तु अजातदंतासु कन्यासु एकाहः। अजातदंतासु पि
त्रोरेकरात्रमिति त्रिरो खकाश्मीजिनिभ्यां स्मरणात्॥ ततस्त्र्यहं। प्रत्ताप्रत्तासु योषित्सु संस्कृतासं
स्कृतासु च॥ मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधीति काश्मीजिनिस्मरणात्॥ इह चाप्रत्तासु
त्रिरात्रविधानं जातजातदंतविषयं संस्कृतासु पित्रोस्त्रिरात्रविधानं तदूर्ध्वमरणविषयकं

७ मितिमाधवः॥ तथा च विष्णुः॥ संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे॥ तत्प्रसवमरणे चेत्पितृगृहे स्यातां
तदैकरात्रं त्रिरात्रं वेति॥ अन्ये तु गृहान्तरमरणे पित्रोस्त्रिरात्रं। काश्मीरि निवचनात्। विष्णुवचनं तु
पितृत्वादीन्प्रत्येव प्रवर्त्तत इत्याहुः। एकरात्रं त्रिरात्रं वेति विष्णूक्तो विकल्पश्च व्यवस्थितः। प्रसवे
एकाहः। मरणे त्रिरात्रमिति विज्ञानेश्वरः। माधवस्त्वाह॥ प्रसवे मरणे च बंधुवर्गस्यैकरात्रं पि
त्रोस्त्रिरात्रमिति व्यवस्था॥ दत्ता नारी पितुर्गेहे सूयेताथ म्रियेत वा॥ तद्बंधुवर्गस्त्वेकेन शु
चिस्तत्जनकस्त्रिभिरिति ब्रह्मपुराणवचनात्॥ इदानीं सपिंडजनने उपनीतमरणे च वर्णभे
देनाशौचभेदमाह मूले॥ ब्राह्मणो दशरात्रेण क्षत्रियो द्वादशाहतः॥ वैश्यः पंचदशाहेन शू राम
द्रो मासेन शुध्यति॥ सपिंडजनने उपनीतसपिंडमरणे चेति शेषः। तथा च मनुः। दशाहं शाव ७
माशौचं सपिंडेषु विधीयते॥ जनने प्येवमेव स्यान्निपुणां शुद्धिमिच्छतामिति। द्विजशुश्रू



षादिकर्मवृत्ते तु शूद्रे पक्षमेव॥ त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिन इति याज्ञवल्क्यस्म
रणात्॥ समानोदके तु त्रिरात्रं। तथा च मनुः॥ जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते इ
ति। बृहस्पतिरपि॥ दशाहेन सपिंडास्तु शुध्यंति प्रेतसूतके। त्रिरात्रेण सकुल्यास्तु शुध्यंति गो
त्रजा इति। सपिंडश्चात्र सगोत्र एव ग्राह्यः। भिन्नगोत्रेषु अल्पाशौचस्यैव वक्ष्यमाणत्वात्॥
कूटस्थमारभ्य सप्तपुरुषाः सपिंडाः। ततः सप्त समानोदकाः। तथा चोक्तं। सपिंडता तु पुरुषे
सप्तमे विनिवर्त्तते। समानोदकभावस्त्वनुवर्त्तमाना चतुर्दशात्। जन्मनाम्नोः स्मृतेरेके तत्प
रं गोत्रमुच्यत इति। तत्र सूत्याशौचं दशाहादूर्ध्वं परिजननज्ञाने नास्त्येव। तथा च देवलः। ना
शुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपीति। तत्रापि पितुः स्नानानंतरमेव शुद्धिः। तथा च मनुः।
निर्दशाज्ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च। सवासा जलमाप्लुत्य शुद्धो भवति मानव इति।
मृताशौचं तु दशाहोपरि मासत्रयात् पूर्वं मरणज्ञाने त्रिरात्रं। ततः आषष्ठं पक्षिणी। तत

८ आनवममहः ततः स्नानमात्रं ॥ तथा च वृहद्वसिष्ठः ॥ मासत्रये त्रिरात्रं स्यात्षण्मासे पक्षिणी भवेत् ॥ अहस्तु
नवमादर्वाग्‌ऊर्ध्वं स्नानेन शुध्यति ॥ अत्र स्नानग्रहणं त्व सहचरितोदकदानोपलक्षणं ॥ वर्षपर्यन्तमेव चे
दं । गुर्धत्वान्न वद एव ॥ तथा च मनुः ॥ संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यतीति अत्रैवकारेणोदकदानादिनि
वृत्तिरित्याहुः ॥ मानववासिष्ठयोः सामान्यविशेषभावेपि अविरोधादर्थैक्यमेवेत्यन्ये ॥ इदं च सर्वं विज्ञा
नेश्वराद्यनुरोधेनोक्तं ॥ माधवमते तु अतीताशौचव्यवस्था भिन्नैव तथा हि त्रिपक्षादर्वाक् त्र्यहः ॥ त
त आषण्मासं पक्षिणी ॥ तत आ वर्षादेकाहोरात्रं तदूर्ध्वं स्नानोदकदान इति ॥ तथा च देवलः ॥ आ त्रिपक्षं त्रि
रात्रं स्यात्षण्मासात्पक्षिणी ततः । परमेकाहमावर्षादूर्ध्वं स्नातो विशुध्यतीति ॥ स्नानग्रहणमुदकदान
स्याप्युपलक्षणमिति ॥ एतच्च त्रिरात्रादिकं समानदेश एव ॥ देशान्तरे तु स्नानमेवेति विज्ञानेश्वरा
दीनां मतं ॥ तथा च स्मर्यते ॥ देशान्तरगतं श्रुत्वा क्लीवे वैखानसे यतौ ॥ सद्य एव विशुध्यन्ति गर्भस्रा राम
वे च गोत्रिण इति माधवमते तु देशान्तरे सपिण्डमरणे त्र्यहादिकं भवत्येव ॥ सद्यः शौचं तु समानोद ८

कमरणविषयकं बाले देशान्तरस्थे च पृथक्पिण्डे च संस्थिते ॥ सवासा जलमाप्लुत्य सद्य एव विशुध्यति ॥ अत्रैहि
देशान्तरस्थत्वेनासपिण्डो विशिष्यते ॥ अत एव विष्णुः ॥ अर्वाक् त्रिपक्षात्त्रिनिशं षण्मासाच्च दिवानिशं ॥ अहः सं
वत्सरादर्वाक् देशान्तरमृतेष्वपीति ॥ वसिष्ठोपि ॥ देशान्तरस्थे मृते तु ऊर्ध्वं दशाहाच्छ्रुत्वैकरात्रमिति ॥ एतच्चा
र्वाक् संवत्सरादर्वाक् देशान्तरमृतेष्वपीति ॥ वसिष्ठोपि ॥ (sic) ... दूर्ध्वं षण्मासादर्वाक् संवत्सराद्बोध्यं ॥ परमेकाहमावर्षादिति स्मरणादिति दिक् ॥ एतानि च विष्णुवसिष्ठा
दिवचनानि विज्ञानेश्वरमते कथं योजनीयानीति चिन्त्यं मूले देशान्तरस्थे प्रेते तु सद्यः शौचं विधीयते ।
दशरात्रस्य मध्ये तु शुध्यते शेषवासरैः । दशरात्राद्दिनैर्वा मासाद्वा विशुध्यति । यदा कदाचित् श्रुत्वा
तु सद्यः शौचं विधीयते इति ॥ अत्र आद्यश्लोकार्द्धं विज्ञानेश्वरमते सपिण्डपरं ॥ माधवमते तु समानो
दकपरमिति स्पष्टमेव । दशरात्रस्याप्युपलक्षणं दशाहाद्यवच्छिन्नोपः स्वस्याशौचकालस्तन्मध्ये
द्वितीयादौ दिवसे जननमरणयोः श्रवणे तु अवशिष्टैरेव दिवसैः शुद्धिरित्यर्थः ॥ द्वितीयश्लोकस्तु
यद्यपि प्रागुक्तवसिष्ठदेवलवचनविरुद्धस्तथापि देशकुलधर्माद्यपेक्षया व्यवस्था बोध्येति हरदत्तः ।

Indira Gandhi National
Centre for the Arts

तथा च दशरात्रादनंतरं मासाद्वीक् दिनेन शुद्धिरिति तदूर्ध्वं सद्यः शौचमिति चानुकल्पोपि बोध्यः।
२ देशांतरलक्षणमाह वृद्धमनुः। महानद्यंतरं यत्र गिरिर्वा व्यवधायकः॥ वाचो यत्र विभिद्यंते तद्दे
शांतरमुच्यते इति॥ बृहस्पतिस्त्वाह॥ देशांतरं वदंत्येके षष्टियोजनमायतं॥ चत्वारिंशद्वदंत्येके
त्रिंशदन्ये तथैव चेति॥ अत्र स्मृत्यर्थसारे इत्थं व्यवस्थोक्ता॥ योजनद्वयाधिकप्रवासस्थानि सिद्धतया
विधिवशेन गच्छन् पुरुषो यत्र मृतस्य वार्त्तामाशौचकालमध्ये प्रापयितुं न शक्नोति तद्देशांतरं।
तथा च विप्रस्य दशाहाशौचिनो विंशतियोजनैर्देशांतरं। क्षत्रियस्य द्वादशाहाशौचिनश्चतु
र्विंशतियोजनैः वैश्यस्य पंचदशाहाशौचिनस्त्रिंशद्योजनैः शूद्रस्य मासाशौचिनः षष्टि राम.
योजनैः। देशकालसुगमदुर्गममार्गापेक्षतो च नयाः सर्वेषां सर्वा लिवा। तथा॥ एकाह २
पक्षिणी त्रिरात्राशौचे बुद्धिर्वतुः षड्योजनरूपदेशांतरादि युक्ति सिद्धा नियोज्यानि।
मातापित्रविषये तु विशेषमाह पैठीनसिः। पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः॥

श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति। मातुः सपत्न्यां तु त्रिदिनं। तथा च स्मृतिः। पितृप
त्न्यामपेतायां मातृवर्जं द्विजातयः। संवत्सरे व्यतीते पि त्रिरात्रमशुचिर्भवेदिति। इदं च दक्ष
वचनेन हीनवर्णासपत्नीमातृविषयमित्याहुः। मातापितृमरणे दशाहमित्युपक्रम्य स्त्रीपुरुष
योः परस्परं चैवं। सवर्णासु मसपत्नीषु चेति स्मृत्यर्थसारोक्तेः॥ इति सगोत्राशौचप्रकरणं॥ वृ
द्धमनुः। पित्रोरूपरमे स्त्रीणां मूढानां तु कथं भवेत्। त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्यमः।
मनुः। त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति। बृहस्पतिः॥ त्र्यहं मातामहाचार्यश्रोत्रि
येष्वशुचिर्भवेत्॥ प्रचेताः॥ मातृष्वसामातुलयोः श्वश्रूश्वशुरयोर्गुरौ॥ मृते चर्त्विजि याज्ये
च त्रिरात्रेण विशुध्यतीति॥ वसिष्ठः। संस्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते॥ सं
स्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थित इति। दाहेन तेन दाहे त्रिरात्रं नान्यथेति गौडा
विदः। आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वश्रूश्वाशुर्यसहाध्यायिशि

Indira Gandhi National
Centre for the Arts

ध्यष्वतीतेष्वेकरात्रेणेति॥ बोधायनः॥ शिष्यसतीर्थ्यसब्रह्मचारिषु त्रिरात्रमहोरात्रमेकाह इति॥
१० मनुः॥ मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु चेति॥ दिवामरणे तदहः अतरात्रिः परेद्युश्च॥ रात्रौ मरणे
तु सा रात्रिः परेद्युरहोरात्रश्चेत्यर्थः॥ पक्षिणीशब्दार्थस्तु हरदत्तेनोक्तः॥ आगामिवर्त्तमानाहर्युक्तायां नि
शि पक्षिणी अमरकोशव्याख्यायां क्षीरस्वामिनाप्युक्तं॥ पक्षाविव पक्षौ पूर्वोत्तरदिवसौ तन्मध्यवर्तिनी
रात्रिः पक्षिणी। तथा निशामध्यगो दिवसोऽपि पक्षिणीति बोध्यमिति॥ एकरात्रमुपक्रम्य याज्ञवल्क्यः॥ गु
र्विते वा स्यनूचाने मातुले श्रोत्रियेषु चेति॥ अंगिराः॥ गृहे यस्य मृतः कश्चिदसपिंडः कथंचन॥ तस्या
प्याशौचं विज्ञेयं त्रिरात्रेनात्र संशयः॥ विष्णुः॥ असपिंडे स्ववेश्ममृते एकरात्रमिति॥ एतेषां च गुरु
लघुकल्पानां सन्निध्यसंनिधिगुणवद्गुणोपकर्त्रनुपकर्तृभेदेन व्यवस्था बोध्या॥ एतच्चाचार्या
दिमरणे त्रिरात्रादिकमन्यस्मिन्दाहकर्तरि॥ यदा तु स्वयमेव करोति तदा विशेषमाह मनुः॥ गुरोः प्रे राम १०
तस्य शिष्यस्तु पितृमेधं समाचरन्॥ प्रेताहारैः समं तत्र दशरात्रेण शुध्यतीति। देशाधिपतौ तु

दिनमृते दिने रात्रिमृते तु रात्रिः॥ तथा च मनुः॥ प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थित इति॥ मानुषास्थि
सरसे बुद्धिपूर्वं स्पृष्टे त्रिदिनं॥ विरसे तु दिनं॥ तथा च वसिष्ठः॥ मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचं॥ अ
स्निग्धं त्वहोरात्रमिति॥ अबुद्ध्या तु सरसे विरसे च स्पृष्टे क्रमेण स्नानमाचमनं च॥ तथा च मनुः॥ नारं स्पृ
ष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति॥ आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविमिति॥ अमानुषा
स्थिस्पर्शे तु भक्ष्यवर्ज्यपंचनखशवं तदस्थि चाससस्नेहं स्पृष्ट्वा स्नातः पूर्ववस्त्रं प्रक्षालितं बिभृयादिति विष्णू
क्तं द्रष्टव्यं॥ आशौचमध्ये आपदि बुद्धिपूर्वं सकृद्भोक्तुर्यस्मिन्दिने भुक्तं ततः शिष्टाहान्याशौचं भवति॥ तथा
च विष्णुः॥ ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्नाति तस्य तावदाशौचं यावत्तेषामिति॥ असकृद्बुद्धि
पूर्वं भोजनेपि एतद्देवाशौचं॥ प्रायश्चित्ते परं विशेषः॥ आपदि तु बुद्धिपूर्वं भोजने त्रिदिनमाशौचं॥ यावत्त
दन्नमश्नाति दुर्भिक्षोपहतो नरः॥ तावन्त्यहान्यशौचं स्यात्प्रायश्चित्तं ततश्चरेदिति स्मृतेः॥ तथा उ
त्कृष्टजातीयस्य सजातीयस्य चानुगमने सचैलस्नानादि॥ यथाह मनुः॥ अनुगम्येच्छया प्रेतं ज्ञातिम

Indira Gandhi National Centre for the Arts

११ ज्ञातिमेव वा॥ स्नात्वा सचेलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति॥ ज्ञातयो मातृसपिंडाः इतरेषामनुगम
नस्याविहितत्वेन दोषात् संस्पर्शात्॥ क्षत्रियानुगमने चैवमिति वसिष्ठोक्तेः॥ एवं क्षत्रियस्य वैश्या
नुगमने होरात्रं। शूद्रानुगमने तु पक्षिणीति विज्ञानेश्वरः। ब्राह्मणस्य शूद्रानुगमने तु विशेषमा
ह पराशरः॥ प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः॥ अनुगच्छन्नीयमाने स त्रिरात्रेण शुध्य
ति॥ त्रिरात्रे तु ततश्चीर्णे नदीं गत्वा समुद्रगां॥ प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति॥ पराशरः।
अनाथं ब्राह्मणं प्रेतं ये वहंति द्विजातयः॥ पदे पदे यज्ञफलमनुपूर्वं लभंति ते॥ न तेषामशुभं किंचित्पा
पं वा शुभकर्मिणां॥ जलावगाहनात्तेषां सद्यः शौचं विधीयते इति॥ धर्मार्थनिर्हरणे चेदं बोध्यं॥ स्ने राम
हादिना निर्हरणे तु मनुराह॥ असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्॥ विशुध्यति त्रिरात्रेण ११
मातुराप्तांश्च बांधवान्॥ यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति॥ अनदन्नन्नमह्नैव न चेत्तस्मि

न्गृहे वसेत्॥ अत्रेयं व्यवस्था॥ स्नेहादिना निर्हृत्य तदीयमन्नमश्नंस्तद्गृह एव वसंस्तो दशाहेन शुद्धिः॥
तद्गृहवासमात्रे त्रिरात्रं। यस्तु न तदीयमन्नमश्नाति न च तद्गृहे वसति तस्यैकाहमिति॥ अहोरात्रमिति वि
जपेयिकृतटीकायां॥ ब्रह्मचारिणस्तु मातापितृव्यतिरिक्तशवनिर्हरणे व्रतलोपः॥ तथा च वसिष्ठः। ब्र
ह्मचारिणः शवकर्मिणो व्रतान्निवृत्तिरन्यत्र मातापित्रोरिति॥ आचार्यपित्रुपाध्यायान्निर्हृत्या
पि व्रती व्रती॥ सकटान्नं च नाश्नीयान्न च तैः सह संवसेदिति॥ आचार्यादीन्निर्हृत्यापि व्रती व्रत्येव न तु
त्यक्तव्रतः स्यादित्यर्थः। कटान्नं। आशौचिनामन्नं ब्रह्मचारी नाश्नीयात्। तैः आशौचिभिः सह न सं
वसेच्चेत्यर्थः। मूलं। सूतके वर्तमाने तु द्वितीयं सूतकं यदि॥ पूर्वेणैव तु शुध्येत जाते जातं मृते मृतं। मृते जा
तके पापीयसा शुद्धिः सा निगद्यते॥ मृतेन शुध्यते जातं न मृतं जातके न तु॥ यदा तु वर्तमानाशौचा
द्दीर्घकालमाशौचं अंतरापतति तदा न पूर्वशेषेण शुद्धिः यथाह यमः॥ अघवृद्धिमदाशौचं प
श्चिमेन समापयेत्॥ यथा त्रिरात्रे प्रक्रांते दशाहं प्रविशेद्यदि॥ आशौचं पुनरागच्छेत्तत्समाप्य

Indira Gandhi National
Centre for the Arts

१२ विशुध्यतीति॥ प्रथमकं प्रवृत्तकालापेक्षया दीर्घकालानुवर्तिनेन विवृद्धा द्याद्याशौचं यदि मध्ये आप
द्येत तदा तत्प्रक्षिप्तेन स्वकालेनैव समापयेदित्यर्थः। अस्यापवादमाह देवलः॥ परतः परतः शु
द्धिरघवृद्धौ विधीयते॥ स्याच्चेत्पंचतमादह्नः पूर्वेणैवात्र शिष्यते॥ अघवृद्धौ दीर्घकालाशौचे परतः
प्राप्ते तत एवास्याः शुद्धिर्विधीयत इति प्रागुक्तेन समानार्थः। यदि तु पूर्वप्रवृत्तमाशौचं पंचमदिनात्परतो
ऽप्यनुवर्तते तदा पूर्वेणैवं शुद्धिः शिष्यते विधीयते॥ यदि पूर्वप्रवृत्तमाशौचं दशाहाशौचकालादधिकः
कालः स्यात्तदा पूर्वेणोत्तरस्य शुद्धिरिति फलितोऽर्थः॥ तद्यथा॥ गर्भपातनिमित्तषडहाशौचमध्ये यदि द
शाहाशौचमापतेत्तदा षडहाशौचशेषेणैव दशाहाशौचस्यापि निवृत्तिः॥ अत्र विशेषो गौतमेनोक्तः।
रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिरिति अस्यार्थं विज्ञानेश्वर आह॥ रात्रिमात्रावशेषे पूर्वाशौचे यद्याशौ राम
चांतरसंनिपतेत्तर्हि पूर्वाशौचसमाप्त्यनंतरं द्वाभ्यां रात्रिभ्यां शुद्धिः प्रभाते पुनस्तस्या रात्रेः पश्चि १२
मे यामे जननाद्याशौचांतरसंनिपाते तिसृभी रात्रिभिः शुद्धिः॥ न पुनस्तच्छेषमात्रेणेति॥ अ

ति। अत्र च॥ प्रत्यूषो हर्मुखं कल्यमुषः प्रत्यूषसी अपि। प्रभातं चेति निघंटुबलादहर्मुखवाचिनो
ऽपि प्रभातशब्दस्य रात्रिचरमयाम लक्षकता यां रात्रिशेषे द्वयहाच्छुद्धिर्यामशेषेषु चित्र्यहादिति शा
तातपवचनमुपष्टंभकं॥ माधवस्त्वाह॥ रात्रिशब्देनाहोरात्रं लक्ष्यते। रात्रिशेषो यस्याशौचस्य तस्मि
न्विद्यमाने यद्याशौचांतरमापतेत नवमदिवसे पूर्णमिति यावत्॥ तदा पूर्वाशौचकालानंतरं द्वाभ्यां
रात्रिभ्यां शुद्धिः प्रभाते तस्या एव रात्रेश्चरमे यामे पुरा सूर्योदयाद्दाशौचसंनिपाते तिसृभी रात्रि
भिः शुद्धिः। न तु पूर्वशेषमात्रेण॥ तथा च शंखलिखितौ॥ अहःशेषे द्वाभ्यां प्रभाते तिसृभिरिति।
बौधायनोऽपि। दशरात्रमाशौचमानवमादिति। अस्यार्थः। यावन्नवमदिवसपरिसमाप्तिः ता
वत्पूर्वाशौचकालशेषेणोत्तरस्य निवृत्तिरिति। देवलोऽपि। पुनःपाते दशाहात्प्राक्पूर्वेण सह ग
च्छति॥ एवं चोदाहृतवचने निघंटुबलाज्ज्ञातमर्थे॥ रात्रिशब्दो होरात्रोपलक्षकः प्रभातशब्द
श्च प्रागुदाहृत शातातपवचनबलाद्रात्रिचरमयाम इति फलितोऽर्थः। यदि तु अविरोधए

Indira Gandhi National
Centre for the Arts

वानयोरुपपास्नी यइत्याग्रहस्तु हि विज्ञानेश्वरीयकफक्किकायामपि रात्रिशब्दो होरात्रपर इत्युक्तं ॥ आ

१३ शौचप्रकरणेऽसर्वत्रैवमिति तेनैव प्रथमतोऽभिधानात् ॥ हरदत्तस्त्वाह ॥ पूर्वस्मिन्नाशौचे रात्रिशेषे सति यद्यन्यु दापतेत् ॥ तदा द्वाभ्यां शुद्धिः सा रात्रिः परेद्युश्चेत्यर्थः ॥ प्रभातेति तिसृभिः अथ दशाहादौ व्यतीते अपरेद्युः प्रभाते संगवे यद्यन्यदापतेत् ॥ ततस्तिसृभिः रात्रिभिः शुद्धिरिति ॥ अत्रापि प्रथमवाक्ये रात्रिशब्दस्याहोरात्रपरत्वे पूर्वपद्विरोध एव ॥ प्रभातशब्दस्य संगवपरत्वे मूलं मृग्यं ॥ शातातपीयवचनविरोधश्च ॥ शक्तिरेवोप भूमिका ॥ अस्मिन्मते माधवाद्युदाहृतद्वित्वसंख्यापूरणं चदशमीं गृहीत्वा न तु द्वादशीमित्यत्र मूल मपि स्थित्यं विध्यनुवादकृतवैरूप्यपरिहारे धवाद्युदाराय हि एवव्याकादशीद्वादश्योरेव ग्रहणं न्या य्यं अन्यथा रात्रिशेषे एकयेत्येव ब्रूयादिति दिक् ॥ पूर्वशेषेण सिद्धेरपवादान्तरं शंखेन दर्शितं ॥ मात र्यग्रे प्रमीतायामशुद्धौ म्रियते पिता ॥ पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीमिति ॥ अ स्यार्थः ॥ मातृमरणप्रयुक्ताशौचमध्ये यदि पिता म्रियेत तदा न पूर्वशेषेण शुद्धिः ॥ किंतु पितृनिमि राम: १३

---

त्ताशौचकालेन पूर्णेनैव ॥ तथा पित्राशौचमध्ये मातरि मृतायां पूर्वाशौचं समाप्य पक्षिणीमधिकां कुर्यादिति ॥ अत्र पित्राशौचे रात्रिशेषे मातरि मृतायां शंखगौतमवचनप्राप्तयोः पक्षिणीद्व्यहयोः कथं बलाबलमिति चिंत्यं ॥ उभयोरपि परस्परपरिहारेणालब्धावकाशतया उत्सर्गापवादन्यायस्याप्रसरात् ॥ अविरोधात्समावेश एव वास्त्विति दिक् ॥ अथाशौचनिषेधाः ॥ ब्रह्मपुराणे ॥ भृगुत्यग्निदृष्टिनरिव्यालविषवह्निमहाजलैः ॥ स्तुद् निर्दग्धा ह्यात्मघ्ना नाशौचं ये राज्ञा रात्पनिहताश्चैवः कुर्वन्क्रीडामृतस्तथा ॥ नागानां विप्रियं कुर्वन्दग्धश्चाप्यथ वह्निना ॥ असमानैश्च चण्डालैः संकीर्णैश्चैव वधि चौर्यदोषेण कुत्रचित् ॥ परदारान्हरन्तश्च रोषात्तत्पतिभिर्हताः ॥ क्रोधात्प्रायं विषं वह्निं शस्त्रमुद्बंधनं जलं ॥ गिरिवृक्षप्र पातं वा ये कुर्वन्ति नराधमाः ॥ ग्रहं कृत्वा ते निहताश्चण्डालादीन्समाश्रिताः ॥ ब्रह्मदण्डहता ये च ये चैव ब्राह्मणैर्हताः ॥ महापातकिनो ये च पतितास्ते प्रकीर्ति ताः ॥ पतितानामदाहः स्यान्नान्त्येष्टिर्नास्थिसंचयः ॥ न चाश्रुपातः पिंडो वा कार्यं श्राद्धादिकं न चेति ॥ अ पंच दुर्मृतानां श्राद्धादिनिषेधो यावत्संवत्सरं पूर्णे तु वत्सरे प्रेतस्पर्शाद्यादिसंपदानतायोग्यत्वसि ध्यर्थं नारायणबलिं कृत्वा सर्वमौर्ध्वदेहिकं कार्यमेव ॥ तदुक्तं षट्त्रिंशन्मते ॥ ब्राह्मणहतानां च पतितानां

Indira Gandhi National Centre for the Arts

तथैव च॥ ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदैहिकं॥ व्यासो नारायणबलेः प्रेतशुद्धिसंपादकत्वमाह॥ ना
१४ रायणं समुद्दिश्य शिवं वा यत्प्रदीयते॥ तस्य शुद्धिकरं कर्म तद्भवेन्नेतदन्यथेति॥ सर्पहते तु विशेषः स्मर्य
ते भविष्यत्पुराणे॥ सुवर्णकारनिष्पन्नं नागं कृत्वा तथैव गां॥ व्यासाय दत्वा विधिवत्पितुरानृण्यमाप्नुवा
दिति। तदनेन सौवर्णनागं दद्यात्प्रत्यक्षां गां चेति तदुक्तं भवति॥ तदेतत्सर्वं दर्पाद्बलीवर्द्दवधाद्
णो बाहुभ्यां महानदीतरणोद्योगप्रवृत्तस्य न संशयं पंपं पंद्येतैत्येतच्छास्त्रमुल्लंघयतः प्रमीतस्य बोध्यं।
प्रमादमरणे त्वाशौचादिकमस्त्येव॥ तथा चांगिराः॥ यदि कश्चित्प्रमादेन म्रियेताऽग्न्युदकादिभिः॥ तस्या
शौचं विधातव्यं कर्तव्या चोदकक्रियेति॥ वैधमरणे तु विशेषमाह शातातपः॥ वृद्धः शौचक्रियालुप्तः प्रत्या
ख्यातभिषक्क्रियः॥ आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनांबुभिः॥ तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थि
संचयः॥ तृतीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेदिति॥ इदं चाशौचं आहिताग्नेरुपरमे संस्कारादिवस राम.
प्रभृति कर्त्तव्यं। अनाहिताग्नेस्तु मरणदिवसप्रभृति॥ संचयनं तु प्रथमे ह्नि तृतीये न्हीत्यादि १४

विहितं उभयोरपि संस्कारदिवसप्रभृत्येव॥ तदाहांगिराः॥ अनग्निमत उत्क्रांतेः साग्नेः संस्कारक
र्मणः॥ शुद्धिः संचयनं दाहान्मृताहस्तु यथाविधीति॥ साग्नेः संस्कारकर्मण इति श्रवणात्॥ आहिता
ग्नेः पितुर्विदेशात्तस्य मृते तत्पुत्रादीनां आसंस्कारात्संध्यादिकर्मलोपो नाऽस्ति॥ तथा च पैठीनसिः॥
दाहादग्निमतो विद्याद्विदेशस्थे मृते सतीति। आशौचमित्यनुवर्त्तते। अनाहिताग्नेस्तु विधिवद्दा
हाभावे तदानीमाशौचग्रहणं वैकल्पिकं॥ ततश्चागृहीताशौचानां संस्कारकाले पुनस्त्र्यहं॥ अगृही
ताशौचानां तु पूर्णदशाहाद्येव पुत्राणां पत्न्याश्च॥ पत्नी पुनः संस्कारे पुनश्चैवं॥ सपत्न्यामित्यश्चैवं।
अगृहीताशौचानां सपिंडानां तु त्रिरात्रं॥ गृहीताशौचानां सपिंडानां तु पुनराशौचं नास्त्येवेत्या
दिस्मृत्यर्थसारे। स्मर्यते च। सुपुष्टे जलसंमिश्रे दृग्धव्यश्च तथा पिता॥ असौ स्वर्गीयलोकाप्त्वा
हेत्पुत्रकास बांधवैः॥ एवं पर्णशरं दग्ध्वा त्रिरात्रमशुचिर्भवेदिति। आहिताग्नेस्तु प्रकृतिदाह
विसपिंडानां दशाहमेव॥ तथा वसिष्ठः॥ आहिताग्निश्चेत्प्रवसन्म्रियेत पुनः संस्कारं कृत्वाश

Indira Gandhi National
Centre for the Arts

ववदाशौचे। जननादिता मेन त्रिरात्रमिति इदं चाशौचं द्विविधं ॥ अस्पृश्यत्वप्रयोजकं कर्मानधिका
१५ रप्रयोजकं च तद्विवेकस्त्वित्थं । पुत्रे जाते पितुः आस्नानमस्पृश्यता ॥ मातुर्दशाहं ॥ सपिंडानां त्वस्पृश्यतानो
स्त्येव ॥ तथा च संवर्त्तः ॥ जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ॥ माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं
पितुः। पैठीनसिः ॥ जननेस पिंडाः शुचयो मातापित्रोस्तु सूतकं ॥ सूतकं मातुरेव स्यादुपस्पृश्य पिता
शुचिरिति ॥ सूतिकातु ॥ पुत्रजनने सति विंशतिरात्रं कर्मार्हा न हि ॥ कन्याजनने तु मासं ॥ पथाजन्म
दिवसे तु दानादिविषयेऽधिकारोऽस्त्येव ॥ तथा च शंखलिखितौ ॥ कुमारप्रसवे नाभ्यामच्छिन्नायां गु
डतिलहिरण्यवस्त्रप्रावरणगोधान्यप्रतिग्रहेष्वदोषस्तदहरित्यक इति ॥ मनुः ॥ जाते कुमारे तदहः
कामं कुर्यात्प्रतिग्रहं ॥ पक्वान्नं तु निषेधति हारीतबल्लपः ॥ तत्र सर्वप्रतिग्राह्यं कृतान्नं तु न भ राम·
क्षयेत् ॥ भक्षयित्वा तु तन्मोहाद्द्विजश्चांद्रायणं चरेदिति ॥ बौधायनोपि ॥ गुडतिलहिरण्यानां १५
गोधान्यानां च वाससां ॥ तस्मिन्नहनि दानं च कार्यं विप्रैः प्रतिग्रहः ॥ प्राङ्नाभिच्छेदनात्प्राश

ण्यतानीत्यपरे जगुः ॥ तथा व्यासः ॥ सूतिकावासनिलया जन्मदा नाम देवताः ॥ तासां यागनिमित्तं
तु शुद्धिर्जन्मनि कीर्तिता ॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ॥ त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्म
नीति ॥ यागनिमित्तपूजानिमित्तमित्यर्थः ॥ मार्कंडेयः ॥ रक्षणीया तथा षष्ठी निशा तत्र विशेषतः ॥ रा
त्रौ जागरणं कुर्युर्दशम्यां चैव सूतके इति ॥ मृताशौचेपि सर्वेषामस्पृश्यत्वमौत्सर्गिकं ॥ अनुपनीत
मरणे स्वस्वाशौचत्रिभागादूर्ध्वं स्पृश्याः ॥ स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागत इति वचनात् ॥
अस्थिसंचयनादूर्ध्वमंगस्पर्शनं तु कलिनिषिद्धप्रागेवपरिगणितमिति संक्षेपः ॥ कौर्मे ॥ नैष्ठि
कानां वनस्थानां यतीनां ब्रह्मचारिणां ॥ नाशौचं कीर्तितं सद्भिः पतिते च तथा मृते ॥ समावर्तनानंतरं तु
प्राङ्मृतानां सपिंडादीनामुदकदानमाशौचं कुर्यादेव ॥ यथाह मनुः ॥ आदिष्टी नोदकं कुर्यादाव्रत
स्य समापनात् ॥ समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेदिति ॥ आदिष्टं व्रतमस्यास्तीत्यादिष्टी
ब्रह्मचारी ॥ एतच्च पित्रादिव्यतिरिक्तविषयं । आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती
त्याह बल्लपस्मरणात् ॥ पित्रादिष्युदकं कुर्वन्ब्रह्मचारी आशौचमपि लभत इत्याहुः ॥

Indira Gandhi National
Centre for the Arts

तदुक्तं त्रिंशच्छ्लोक्यां॥ तातां बाचार्य्यकेभ्योऽनलजलतिलदो ब्रह्मचारी तदीयाशौचइति॥ विश्वरूपाचा
१६ र्यास्तु॥ उक्तौ दिष्टौ प्रक्रांतप्रायश्चित्त इत्याहुः॥ गद्यं विष्णुः। नराज्ञां राजकर्मणि न व्रतिनां व्रते न स
त्रिणां सत्रे न कारूणां कारुकर्मणि। देहीन सिद्धः। विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि॥ न तत्र सूतकं
तद्वत्कर्मयज्ञादिकारयेत्॥ स्मृत्यंतरे॥ यज्ञे संभृतसंभारे विवाहे श्राद्धकर्मणीति॥ सद्यः शौचम
त्रानुवर्त्तते॥ विवाहग्रहणं च पूर्वप्रवृत्तचौलोपनयनादिसंस्कारकर्मोपलक्षणं। यज्ञग्रहणं च पूर्व
प्रवृत्तप्रतिष्ठारामाद्युपलक्षणमिति विज्ञानेश्वरः॥ ॥इति श्रीमत्पदवाक्यप्रमाणपारावारीण
भट्टोजी दीक्षितकृते चतुर्विंशतिमते आशौचप्रकरणं समाप्तम्॥ शुभं भूयात् लेखकपाठक
योः॥ संवत् १८३२ शाके १६९७ आश्विने शुक्लपक्षे तिथौ द्वादश्यां भृगौ रामनाथेन लिखितं मिदंम
हस्ये दं पुस्तकम्॥ श्रीरस्तु॥ श्रीसीतारामाभ्यां नमः॥ ॥राम॥ राम ॥ राम॥ राम॥ राम
१६

Indira Gandhi National
Centre for the Arts